CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.M.

Coll. No. 827

Title Tripurasundarīpūjā paddhati.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 829 Subject: Tantric R.t.

Title: Tripurasundarī pūjāpaddhati

Author: Nityānanda nātha Scribe: –

Date of the work: – Date of the Ms.: V.S. 3<38

Place of the work: – Place of the Ms.: –

Size: 6·2" by 3·4. Extent: 65 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: –

॥अहिल्यायां जारः सुरपतिरभूदात्मत
नयां प्रजानाथोप्यासीदभजत गुरो
रिंदुरबलां॥ इति प्रायः को वा न पद
मपथेऽकार्यतमया श्रमो मद्बाणानां
क इव भुवनोन्माथविधिषुः॥

श्रीगणेशायनमः॥ ॥अथार्घस्थापनं
तत्रस्ववामभागेजलेनचंदनानुलिप्तेभूत
लेवहन्नासोर्द्धपुटाभ्यांकराभ्यांत्रिकोणषट्
कोणवृत्तचतुरस्रमंडलंकृत्वाशंखमुद्रामु
द्रितवामकरेणाबध्यश्रीमहात्रिपुरसुंदर्याः त्रि॰प॰
कलशाधारमंडलायनमः इतिसंपूज्य।मूले १
नचसंपूज्यकूटत्रयेणप्रत्येकंत्रिकोणकोणा

न्संपूज्य।कूटत्रयद्विरावृत्त्याषट्कोणकोणा
न्संपूज्यचतुरस्रस्यवायव्यनैर्ऋत्यईशाना
ग्नेयपश्चिमादिचतुर्दिक्षुचषडंगमंत्रैःप्राद
क्षिण्येनसंपूज्यपश्चिमादिचतुर्दिक्षुमध्ये
च।ॐऐंह्रींश्रींग्लूंगगनरत्नायनमः।ध स्लूं
स्वर्गरत्नायनमः।ध म्लूंमर्त्यरत्नायनमः।ध
ह्लूंपातालरत्नायनमः।ध ल्लूंनागरत्नायनमः

इतिसंपूज्यमूलेनप्रक्षालिताधारंदक्षहस्तेन
मंडलोपरिसंपूज्यसंस्थाप्य। ४ मंवह्निमंडला
यधर्मप्रददशकलात्मनेश्रीमहात्रिपुरसुंद
र्याः कुंभाधारायनमइतिसंपूज्य। तत्रप्रादक्षि
ण्येनस्वाग्रादिवह्नेर्दशकलाः पूजयेत्। तद्य
था। यंधूम्रार्चिषेनमः। १। रंउष्मायै। २। लंज्व
लिन्यै। ३। वंज्वालिन्यै। ४। शंविस्फुलिंगि

त्रि॰प॰
२

न्यै। ५। षंसुश्रियै। ६। संसुरूपायै। ७। हंकपिला
यै। ८। ळंहव्यवाहायै। ९। क्षंकव्यवाहायै।
१०। वामकरेणप्रक्षालितंसुधूपितंकुंभंसं
स्थाप्य। हंअर्घमंडलायार्थप्रदद्वादशकला
त्मनेश्रीमहात्रिपुरसुंदर्याः कुंभायनमः। त
त्रसूर्यस्यद्वादशकलाः पूजयेत्। यथाकंभं
तपिन्यैनमः। १। खंबंतापिन्यै। २। गंफंधूम्रायै।

३ घं पं मरीच्यै ।४ ङं नं ज्वालिन्यै ।५ चं धं रुच्यै ।
६ छं दं सुषुम्णायै ।७ जं थं भोगदायै ।८ झं तं
विश्वायै ।९ ञं णं बोधिन्यै ।१० टं ढं धारिण्यै ।
११ ठं डं क्षमायै ।१२ इति संपूज्य । तत्र पात्रांतर
स्थं शुद्धतीर्थजलं मूलांते विलोममातृकामु
च्चरन् वामहस्तधृतपुष्पादिनाधारां संस्पृ
शन् संपूज्य । अज्वादिकं विनिक्षिप्य । संसो

त्रि॰प॰
३

ममंडलाय कामप्रदषोडशकलात्मने श्रीम
हात्रिपुरसुंदर्याः कुंभामृताय नमः इति संपू
ज्य । ऐं क्लीं सौः इति पुष्पेणालोड्य तत्पुष्पं नि
रस्य पुष्पांतरं तत्र क्षिपेत् । सोमस्य षोडशक
लाः पूजयेत् । यथा । अं अमृतायै ।१ आं मा
नदायै ।२ इं पूषायै ।३ ईं तुष्ट्यै ।४ उं पुष्ट्यै ।५
ऊं रत्यै ।६ ऋं धृत्यै ।७ ॠं शशिन्यै ।८ लृं चंद्रि

कायै ॥९॥ ऌं कांत्यै ॥१०॥ एं ज्योत्स्नायै ॥११॥ ऐं श्रि
यै ॥१२॥ ॐ प्रीत्यै ॥१३॥ ॐ अंगदायै ॥१४॥ अं पूर्णा
यै ॥१५॥ अः पूर्णामृतायै ॥१६॥ इति संपूज्य ह
सखफ्रें पथिकदेवतादिदशदेवताभ्यो नमः
क्लीं ॐ हंसः स्वाहा इत्यष्टवारमभिमंत्र्य षडंग
मंत्रैः संपूज्य मूलेन संपूज्य योनिमुद्रया प्र
णमेत् ॥ इति कुंभस्थापनं ॥ सामान्यार्घस्थाप

त्रि॰प॰
४

नं कुर्यात् ॥ तत्र स्ववामभागे कुंभसमीपे त्रि
कोणवृत्तचतुरस्रं मंडलं कृत्वा ॥ शंखमुद्रा
मुद्रितकरः श्रीमहात्रिपुरसुंदर्याः सामा
न्यार्घाधारमंडलाय नम इति संपूज्य ॥ तत्रा
धारं निधाय ॥ रं वह्निमंडलाय धर्मप्रददश
कलात्मने श्रीमहात्रिपुरसुंदर्याः सामान्या
र्घाधाराय नम इति संपूज्य ॥ तत्र शंखं निधा

य। हं अर्कमंडलायार्थप्रदद्वादशकलात्मने श्री
महात्रिपुरसुंदर्याः सामान्यार्घपात्राय नमः
विलोममातृकां पठन् जलेनापूर्य। संसोममं
डलाय षोडशकलात्मने श्रीमहात्रिपुरसुंद
र्याः सामान्यार्घजलाय नम इति संपूज्य। तत्र
तीर्थमावाह्य धेनुमुद्रयामृतीकृत्य। शंखमु
द्रां प्रदर्श्य मत्स्यमुद्रया आच्छादयेत्। इति सा

त्रि॰प॰
५

मान्यार्घ्यस्थापनं। ततः आत्मश्रीचक्रयोर्मध्ये
चंदनानुलिप्ते भूतले सामान्यार्घ्यजलेन ऊर्ध्व
पुटाभ्यां कराभ्यां चतुरस्रत्रिकोणषट्कोणवृत्त
चतुरस्रं मंडलं कृत्वा। शंखमुद्रामुद्रितवामक
रांगुष्ठेन मंडलमवष्टभ्य श्रीमहात्रिपुरसुंदर्याः
विशेषार्घपात्राधारमंडलाय नम इति संपूज्य।
त्रिकोणं कूटत्रयेण षट्कोणं कूटत्रयद्विरावृत्त्या

चतुरस्रं पूर्वोक्तपंचरत्नैः संपूज्य तत्राधारं मुक्ता
मंरं वह्निमंडलाय धर्मप्रददशकलात्मने श्रीम
हात्रिपुरसुंदर्याः विशेषार्घ्यपात्राधाराय नमः
तत्र पूर्वोक्तवह्नेर्दशकलाः संपूज्य । तत्र दक्षह
स्तेन स्वर्णादिपात्रं निधाय ॥ अं हं अर्कमंडलाय त्रि॰प॰
अर्थप्रदद्वादशकलात्मने श्रीत्रिपुरसुंदर्याः वि ६
शेषार्घ्यपात्राय नमः इति संपूज्य तत्र सूर्यकलाः

प्राग्वत् संपूज्य मूलमंत्रं विलोममातृकामुच्चर
न् कुंभजलेनापूर्य । उं सं सोममंडलाय कामप्र
द षोडशकलात्मने श्रीमहात्रिपुरसुंदर्याः वि
शेषार्घ्यपात्रामृताय नम इति संपूज्य । ऐं इति पु
ष्पेणालोड्य तत्पुष्पं निरस्य पुष्पांतरं क्षिपेत् । त
त्र पूर्वोक्तषोडशकलाः पूजयेत् । तत्र आनंदभै
रवं गंधादिभिः संपूज्य । हसक्षमलवयरां सुधा

देव्यै वौषट् सुधा देवी श्रीपादुकां पूजयामि तर्पया
मि नम इति त्रिः संपूज्य संतर्प्य । ऐं ह्रूं ह्रौं ह्रूं सः अ
मृते अमृतोद्भवे अमृतेश्वरि अमृतं स्रवय २ स्रा
वय स्वाहा अमृतेश्वरी श्रीपा । मूलेनाभिमंत्र्य धे
नुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य महामुद्रां त्रि·प·
प्रदर्श्य तत्त्वमुद्रया आच्छादयेत् । इति विशेषा ५
र्घस्थापनं । ततो विशेषार्घामृतबिंदुं कलशे नि

क्षिप्य तत्परतस्तेनैव विधिना आवरणपूजार्थं
श्रीपात्रं स्थापयेत् । मूलदेव्याः पूजनं तर्पणं च पू
जासमर्पणं च विशेषार्घ्यामृतेन कार्यं । आवरण
देवतानां पूजनं तर्पणं च श्रीपात्रामृतेन कार्यं
पूजासमर्पणं च सामान्यार्घ्यजलेन च कार्यं । अ
थ श्रीपात्रस्थापनं । विशेषार्घ्यमंडलवत् मंडलं
संपूज्य श्रीमहात्रिपुरसुंदर्याः रश्मिदेवताप

जाश्रीपात्राधारमंडलायनम इतिसंपूज्यतत्रा
धारंनिधायरंवह्निमंडलायधर्मप्रददशकला
त्मनेश्रीमहात्रिपुरसुंदर्याः रश्मिदेवतापूजन
श्रीपात्राधारायनमः। पात्रमुत्काहंअर्घमंड
लायार्थप्रदद्वादशकलात्मनेश्रीमहात्रिपुरसुं त्रि·प·
दरीरश्मिदेवतामृतायनमः। इतिसंपूज्य। षडं ८
गमंत्रैः संपूज्यधेनुमुद्रयामृतीकृत्यमत्स्यमुद्र

याछादयेत्॥ इतिश्रीपात्रस्थापनं। ततः गुरुपा
त्रआत्मपात्रशक्तिपात्रबलिपात्राणिसामान्या
र्घविधिनास्थापयेत्। ततः पाद्यअर्घ्यआचम
नीयमधुपर्कपात्राणिसंस्थापयेत्॥ इतिपात्र
स्थापनविधिः॥ ततः विशेषार्घ्यजलेनपूजो
पकरणानिआत्मानंचसंप्रोक्ष्यस्वशिरसि
पादयोः अंसयोः पुष्पांजलिंदत्वागंधर्वरूप

वान् भूत्वा मूर्ध्नि गुरुपंक्तित्रयं पूजयेत् । ब्रह्मरंध्रपृ
ष्ठभागे त्रिकोणं विभाव्य । तत्र प्रथमरेखायां दक्षिणा म२
द्युत्तरांतं दिव्यौघेभ्यः परमगुरुभ्यो नमः इति पुष्पं
दत्वा । ऐं परप्रकाशानंदनाथश्रीपा० । १ । ऐं पर
शिवानंदनाथश्रीपा० । २ । ऐं परशक्त्यंबाश्री० त्रि० प०
३ । ऐं कौलेश्वरानंदनाथश्री० । ४ । ऐं शुक्लादेव्यं ९
बाश्री० । ५ । ऐं कुलेश्वरानंदनाथश्री० । ६ । ऐं का

मेश्वरानंदनाथश्री० । ७ ॥ इति दिव्यौघः ॥ द्विती
यरेखायां पश्चिमादिपूर्वांतं सिद्धौघेभ्यः परम
गुरुभ्यो नमः । इति पुष्पं दत्वा ॥ ऐं भोगानंदनाथ
० । १ । ऐं क्लिन्नानंदनाथ० । २ । ऐं समयानंदनाथ०
३ । ऐं सहजानंदनाथ० । ४ । इति सिद्धौघः । तृतीय
रेखायां पूर्वादिपश्चिमांतं मानवौघेभ्यः पराप
रगुरुभ्यो नमः । इति पुष्पं दत्वा । ऐं गगनानंदना

थ॰ १ ऐं विश्वानंदनाथ॰ २ ऐं विमलानंदनाथ॰
३ ऐं मदनानंदनाथ॰ ४ ऐं भुवनानंदनाथ॰ ५
ऐं लीलादेव्यंबाश्री॰ ६ ऐं स्वात्मानंदनाथ॰ ७
ऐं प्रियांबाश्री॰ ८ इति मानवौघः। ततः स्वगु
रुपरंपरां संपूज्य। आत्मविद्याशिवः सर्वमि
ति तत्वचतुष्टयमिति तत्वशुद्धिं कृत्वा। काम
कलारूपमात्मानं ध्यात्वा। जपं कृत्वा समर्प्य

त्रि॰प॰
१०

पीठपूजामारभेत्। ॐ मंडूकाय नमः कालाग्नि
रुद्राय॰ मूलप्रकृत्यै॰ आधारशक्त्यै॰ कूर्मा
य॰ अनंताय॰ वाराहाय॰ पृथिव्यै॰ पश्चि
मे इक्षुसमुद्राय॰ दक्षे मदिरासमुद्राय॰ पूर्वे
घृतसमुद्राय॰ उत्तरे दुग्धसमुद्राय॰ मध्ये
अं ५१ नवषंडविराजितनवरत्नद्वीपाय॰ प
श्चिमादिविलोमेन मध्ये च। पुष्परत्नाय॰ नी

लरत्नाय॰ वैडुर्यरत्नाय॰ ३ प्रवालरत्नाय॰ ४ मौक्ति
करत्नायनमः ५ मरकतरत्नाय॰ ६ वज्ररत्नाय॰
७ गोमेदरत्नाय॰ ८ पद्मरागरत्नाय॰ ९ तेषुखं
डेषु अं ८ कालचक्रेश्वर्यै॰ लृं ८ मुद्राचक्रेश्वर्यै॰
देश कं मातृचक्रेश्व॰ कं ५ मातृचक्रे॰ २ टं रक्षचक्रे॰
३ तं गुरुचक्रे॰ ४ पं ५ तत्वचक्रेश्व॰ ५ यं ६ अ त्रि॰प॰
हचक्रे॰ ६ शं ६ मूर्त्तिचक्रेश्वरी॰ ७ मध्येस्वर्णप ११

र्वताय॰ नंदनोद्यानाय॰ करुणातोयपरिधये॰
स्वर्णप्राकाराय॰ कदंबवनाय॰ मणिमंडपाय॰
तस्यनैर्ऋत्यादिविलोमेन। कालरूपिणीशक्त्यै॰ १
देशरूपिणीश॰ २ आकाररूपिणीश॰ ३ शब्दरू
प३ पिणीश॰ ४ मंडमध्येसंगीतयोगिनीश॰ ५ सम
स्तप्रकटगुप्तसिद्धयोगिनीश॰ मणिमयवेदि
कायै॰ कल्पवृक्षेभ्यो॰ श्वेतछत्राय॰ रत्नसिंहास

नाय ॥ श्रीचक्राधारसिंहासनाय ॥ तस्य वायव्या
दिकोणेषु प्रादक्षिण्येन । धर्माय ॥ ज्ञानाय ॥ वैराग्या
य ॥ ऐश्वर्याय ॥ तस्य चतुर्दिक्षु । अधर्माय ॥ अज्ञा
नाय ॥ अवैराग्याय ॥ अनैश्वर्याय ॥ मध्ये माया
यै ॥ विद्यायै ॥ अनंताय ॥ पद्माय ॥ आनंदकंदा त्रि॰प॰
य ॥ संविन्नालाय ॥ प्रकृतिमयपत्रेभ्यो ॥ विकृ १२
तिमयकेसरेभ्यो ॥ पंचाशद्वर्णबीजाय सर्वत

त्वमयकर्णिकायै ॥ संसत्वाय ॥ रं रजसे ॥ तं त
मसे ॥ आं आत्मने ॥ अं अंतरात्मने ॥ पं परमात्म
ने ॥ ह्रीं ज्ञानात्मने ॥ ह्रीं ज्ञानतत्वात्मने ॥ मायात
त्वात्मने ॥ कालतत्वात्मने ॥ विद्यातत्वात्मने
॥ परमतत्वात्मने ॥ अष्टदलकेसरेषु मध्ये च
द्रछाशक्त्यै ॥ ज्ञानशक्त्यै ॥ क्रियाशक्त्यै ॥ कामिनी
शक्त्यै ॥ कामदाशक्त्यै ॥ रतिशक्ति ॥ रतिप्रियाश॰

आनंददाशक्ति॰ मध्येमनोन्मनीश॰ ह्रीं स
र्वशक्तिकमलासनाय नमः समस्तपीठं संपू
ज्य तदुपरि श्रीचक्रं निधाय बिंदुचक्रे ॐ ऐं क्लीं
श्रीं मूलं ह्रौं क्लीं भगवति ब्लूं नित्ये कामेश्वरि श्री
सर्वशक्तिवशंकरि सः त्रिपुरभैरवि ऐं विद्ये क्लीं
श्रीं श्रीमहात्रिपुरसुंदरीपादुकां पूजयामीति
त्रिः संपूज्य बाह्यचक्रत्रये अंत्यचक्रत्रये मू

त्रि॰प॰
१३

लकूटत्रयेण शरीरात्मने॰ बुद्ध्यात्मने॰ प्राणा
त्मने॰ मध्यत्रिकोणाग्रकोणे प्रथमकूटं काम
रूपपीठाय॰ दक्षकोणे द्वितीयकूटं पूर्णगिरि
पीठाय॰ वामकोणे तृतीयकूटं जालंधरपी॰
मध्ये बिंदुचक्रे मूलं महोड्यानपीठाय॰ बिंदौ
हिरण्मयसहस्रदलकमलाय तत्कर्णिकायां
वायव्यादिनैर्ऋत्यांतं ह्रां ब्रह्मणे पृथिव्यधिप

तयेनमः ब्रह्मप्रेतासनश्री ॰ । क्लीं विष्णवे जलाधिप
तयेनमः विष्णुप्रेतासनश्री ॰ । क्लूं रुद्राय तेजोधि
पतयेनमः रुद्रप्रेतासनश्री ॰ । ह्रैं ईश्वराय वाद्या
धिपतयेनमः ईश्वरप्रेतासनश्री ॰ । मध्ये ह्सौः
ह्रौं वियदाधिपतये सदाशिवाय नमः सदाशि
वप्रेतासनश्री ॰ । इति पंचप्रेतासनं संपूज्य । त
दुपरि रक्तपद्मकर्णिकायां षट्कोणं विभाव्य

त्रि॰प॰
१४

तत्कोणेषु पश्चिमादिप्रादक्षिण्येन अं आं सौः
त्रिपुरासुधार्णवासनाय ॰ । ऐं क्लीं सौः त्रिपुरेशी
पोतांबुजासनाय नमः । क्लीं क्लीं सौः त्रिपुरसुंद
रीदेव्यासनाय ॰ । ह्रैं ह क्लीं ह्सौः त्रिपुरवासिनीस
र्वचक्रासनाय ॰ ह्सैं ह स क्लीं ह्सौः त्रिपुराश्रीस
र्वमंत्रासनाय ॰ । क्लीं क्लीं ब्लें त्रिपुरामालिनीसाध्य
सिद्धासनाय ॰ । इति संपूज्य । चतुरस्रेनादशक्तौ ॰

षोडशदले बिंदुशक्त्यै । अष्टदले कल्पशा । चतुर्द
शारे ज्येष्ठाशा । बाह्यदशारे रौद्रीशक्त्यै । अंतर्दशा
रे वामाशा । अष्टकोणे विषघ्नीशा । त्रिकोणे दूती
शक्ति । बिंदुचक्रे सर्वानंदाशा । अं ५१ शिवश
क्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकला त्रि·प·
रागकालनियतिपुरुषप्रकृत्यहंकारबुद्धिम १५
नःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपाद

पायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुते
जःसलिलभूम्यात्मने षट्त्रिंशत्तत्वरूपाय श्री
महात्रिपुरसुंदर्यायोगपीठाय नम इति पुष्पां
जलिं दद्यात् ॥ कराभ्यां पुष्पांजलिं गृहीत्वा । त्रिखं
डामुद्रां बद्ध्वा मूलाधाराद्दीपाद्दीपांतरमिव कु
लकुंडलिनीं हृदयस्थाष्टदले रक्तपंकजे समानी
य वहन्नासापुटेन कुसुमांजलावावाह्य । महाप

भवनांतस्थे करुणानंदविग्रहे। सर्वभूतहिते मात
रे ह्येहि परमेश्वरि। देवेशि भक्तिसुलभे परिवारस
मन्विते यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा
भव ह्सैं ह्सक्लीं ह्सौः नमः इति मंत्रेण पुष्पांजलिं बिं
दौ क्षिपेत्। मूलेन मूर्त्तिं परिकल्प्य। आं ह्रीं क्रों यं
रं लं वं शं षं सं हों हंसः श्रीमहात्रिपुरसुंदर्याः
प्राणा इह प्राणाः। आं ह्रीं [illegible] क्रों १२ श्रीमहा॰

त्रि॰प॰
१६

जीव इव इह स्थितः। आं ह्रीं १३ श्रीमहा॰ १३ स
र्वेंद्रियाणि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। त
तो ध्यानं कुर्यात्। मूलेन आवाहिन्या श्रीमहात्रि
पुरसुंदरि इहागच्छ २। मूलं स्थापिन्या श्रीम॰ इह
तिष्ठ २ मूलं संनिधापिन्या श्रीम॰ इह संनिधेहि
२। मूलं संनिरोधिन्या श्रीम॰ इह सन्निरुद्धा भव
२ मूलं संमुख्या श्रीम॰ संमुखा भव २। मूलं अव

गुंविन्याश्रीम॰ अवगुंविताभव २ मूलंश्रीदेव्याः
शरीरेषडंगंकृत्वाश्रीम॰ इहसकलीकृताभव २
मूलंसरलीकरिण्याश्रीम॰ इहसरलीकृताभ
व २ मूलंधेनुमुद्रयाश्रीम॰ इहअमृतीकृताभ
व २ मूलंपरमीकरिण्याश्रीम॰ परमीकृताभ त्रि॰प॰
व २ इतिदशमुद्राःप्रदर्श्य। ऐंवदवदवाग्वादिनी १७
क्लीन्नेक्लेदिनिक्लेदयहसक्लींसौः मोक्षंकुरु

२ ह्सौः अकारादिक्षकारांतांमातृकामुच्चार्यसा
मान्यार्घोदकेनत्रिवारंप्रोक्ष्यसंक्षोभद्रावणाक
र्षवश्योन्मादमहांकुशा। खेचरीबीजयोन्याः
ख्यानवमुद्राःप्रकीर्त्तिताः। ततःपाशांकुशध
नुर्बाणमुद्राःप्रदर्श्यकृतांजलिःश्रीमहात्रिपु
रसुंदरीस्वागतं॰ मूलंश्री॰ कुशलं। मूलंश्री॰
इदमासनंइतिकमलमुद्रांप्रदर्श्य। मूलंश्री॰

श्रीपादुकां पूजयामीति त्रिः संपूज्य। मूलं सर्व
त्र। श्रीम॰ एतत्पाद्यं। श्रीम॰ एतत् अर्घ्यं स्वा
हा। श्रीम॰ एतदाचमनीयं। श्रीम॰ इमं मधुप
र्कं पुनराचमनीयं। श्रीम॰ इदं स्नानं इति पं
चामृतेन भोगमूर्तिं स्नापयित्वा। आचमनं व
स्त्रे गृहाण श्रीम॰ रत्नपादुके परिधाय अलं
कारमंडपमागच्छ। आभरणानि गृहाण त

त्रि॰प॰
१८

तः प्रार्थनापूर्वकं यागमंडपं नीत्वा। स्वर्गंधो
नम इति गंधं। पुष्पाणि वौषडिति पुष्पं। धूपं
दीपं नैवेद्यं तर्पणादि जलं। आचमनं तांबूलं
नीराजनं कृत्वा देवी देहे षडंगं संपूज्य त्रयोद
श मुद्राः प्रदर्श्य पुष्पांजलिं दत्वा। संविन्मये
परे देवि परामृतरसप्रिये। अनुज्ञां त्रिपुरे दे
हि परिवारार्चनाय मे। १। इत्याज्ञां गृहीत्वा ता

मेवरश्मिरूपेणपरिणतांध्यात्वाआवरणपू
जांकुर्यात्॥ ॥इतिश्रीत्रिपुरसुंदरीपूजारत्ने
पात्रस्थापनादिविधौनाममरकतरत्नंनामष
ष्ठंरत्नं॥६॥ ॥तत्रबिंदौपरितःत्रिकोणंस्वरात्म
कंपश्चिमतोअग्निकोणपर्यंतंपंचस्वराः
अग्निकोणादिईशपर्यंतंपंचस्वराःईशात्प
श्चिमावधिपंचस्वराःइतितेषुपंचदशनि

त्रि॰प॰
१५

त्याःपूजयेत्बिंदौअःइतिस्वरेषोडशींयजेत्
अथनित्यापूजनं॥ऐंक्लींसौःॐनमःकामेश्व
रिइच्छाकामफलप्रदेसर्वसत्ववशंकरिसर्व
जगत्क्षोभणकरिहूंहूंद्रांद्रींक्लींब्लूंसःसौः
क्लींऐंअंकामेश्वरीनित्याश्रीपादुकांपूजया
मितर्पयामिनमः॥घृतंनैवेद्यं॥ऐंभगभुगेभ
गिनिभगोदरिभगमालेभगावगाहेभगगुह्ये

हूं ॐ

भगयोनिभगनिपातिनिसर्वभगवशंकरिभग
रूपेभगनित्येभगक्लीन्नेभगस्वरूपेसर्वभगा
निमेस्थानयवरदेरेतेसुरेतेभगक्लिन्नेक्लिन्न
द्रवेक्लेदयद्रावयसर्वसत्वान्भगेश्वरिअमोघे
भगविच्चेक्षुभक्षोभयसर्वसत्वान्भगेश्वरिऐंब्लूं
जंब्लूंभेंब्लूंमोंब्लूंहेंब्लूंहेंक्लिन्नेसर्वाणिभगानि
मेवशमानयस्त्रींहरब्लेंहींआंभगमालिनीनि

त्रि॰प॰
२०

त्याश्री॰२॥शुद्धंनैवेद्यं॥क्लींनित्यक्लिन्नेमदद्रवेस्वा
हाइंनित्यक्लिन्नानित्याश्रीपा॰३॥शर्करानैवेद्यं
ॐक्रौंभ्रौंक्रौंघ्रौंछ्रौंज्रौंक्ष्रौंस्वाहाईंभेरुंडानित्या
श्री॰४॥पोलिनैवेद्यं॥क्लींवह्निवासिन्यैनमःॐव
ह्निवासिनीनित्याश्री॰५॥कदलीफलंनैवेद्यं॥अं
क्लींप्रेंसःनित्यक्लिन्नेमदद्रवेस्वाहाॐमहाविद्ये
श्वरिनित्याश्री॰६॥मधुनै॰ॐक्लींशिवदूत्यैनमः

ॐ ग्रौ ४

क्रं शिवदूती नित्याश्री ॥ ७ ॥ गुडं नैवेद्यं । ॐ क्रीं हूं खे च
छे क्षः स्त्रीं हूं क्षें क्रीं फट् क्रं त्वरिता नित्याश्री ॥ ८ ॥ ना
लिकेरं । ऐं क्लीं सौः कुलसुंदर्यै नमः लृं कुलसुंद
री नित्याश्री ॥ लाजा नै ॥ ऐं क्लीं सौः हसकलरडैं ह
सकलरडीं हसकलरडौं हुं हुं द्रां द्रीं क्लीं ब्लूं सः लृं
नित्या नित्याश्री ॥ १० ॥ तिलाः नै ॥ ॐ क्रीं फ्रें स्रूं क्रीं
क्रों नित्यमदद्रवे रुं क्रों एं निलपताका नित्याश्री ॥

त्रि॰प॰
२१

११ ॥ दधि नैवेद्यं । ह्स्रव्ह्रें विजयायै नमः ऐं विजया नि
त्याश्री ॥ १२ ॥ पृथुकाः नै ॥ स्वां सर्वमंगलायै नमः ।
ॐ सर्वमंगला नित्याश्री ॥ १३ ॥ चणकाः नैवेद्यं । ॐ न
मो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंत
संहारकारके जातवेदसि ज्वलंती ज्वल २ प्रज्वल
२ हूं २ रं २ हूं फट् ज्वालामालिनी नित्याश्री ॥ १४
मुद्गाः नैवेद्यं । क्रों विचित्रायै नमः अं विचित्रा नि

त्याश्री ॰ १५ । पायसं नैवेद्यं । षोडशीमुच्चार्य अः
मध्ये श्री त्रिपुरसुंदरी श्री ॰ १६ । कृष्णपक्षे विचि
त्राद्याः विलोमेन पूज्याः । तिथिवृद्धौ एकानि
त्यादीनद्वये । तिथिक्षये नित्याद्वयं एकस्मि
न्दीने पूज्यं इति नित्यापूजनं । परितश्चतुर
स्रं विभाव्य मध्ये चतुर्दिक्षु च पंच पंचिकाः
पूज्याः । ॐ महालक्ष्मीश्वरी वृंदमंडितासनसं

त्रि॰प॰
२२

स्थिता सर्वसौभाग्यजननी श्री पंचलक्ष्मी श्री ॰
ॐ महाकोशेश्वरी श्री ॰ पंचकोशा श्री ॰ । ॐ पंच
कल्पलतेश्वरी ॰ पंचकल्पलता श्री ॰ । ॐ पंच
कामदुघेश्वरी ॰ पंचकामदुघा श्री ॰ । ॐ पंचरत्ने
श्वरी ॰ पंचरत्ना श्री ॰ । अथ पंचायतनं पूजये
त् । मध्ये मूलदेवीं नैर्ऋत्ये गणपतिं । ॐ श्रीं क्लीं
क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमा

नयस्वाहागणपतिस॰श्री॰।वायव्ये।क्रां क्रीं सः श्री
सूर्यस॰श्री॰।ईशान्येॐ नमो नारायणाय नाराय
णस॰श्री॰।आग्नेयेॐ नमः शिवाय शिवस॰।
श्री॰।अथ गुरुपंक्तिपूजा।ऐं परप्रकाशानंदना
थश्री॰।१।ऐं परशिवानंदनाथश्री॰।२।ऐं परश
क्त्यंबाश्री॰।३।ऐं कौलेश्वरानंदनाथश्री॰।४।ऐं
शुक्लादेव्यंबाश्री॰।५।ऐं कुलेश्वरानंदनाथश्री॰

त्रि॰प॰
२३

६।ऐं कामेश्वर्यंबाश्री॰।७।दिव्यौघाः॥ऐं भोगानंद
नाथश्री॰।१।ऐं क्लीन्नानंदनाथश्री॰।२।ऐं समया
नंदनाथश्री॰।३।ऐं सहजानंदनाथश्री॰।४।ऐं भु
वनानंदना सिद्धौघाः॥ऐं गगनानंदनाथश्री॰।१
ऐं विश्वानंदनाथश्री॰।२।ऐं विमलानंदनाथश्री॰
३।ऐं मदनानंदनाथश्री॰।४।ऐं भुवनानंदनाथ
श्री॰।५।ऐं लीलादेव्यंबाश्री॰।६॥ऐं स्वात्मानंदना

थश्री ॰७। ऐं प्रियांबाश्री ॰८। इतिमानवौघाः। ततः
स्वगुरुपरमगुरुपरापरगुरुश्री ॰। पूर्वे ऐं सर्वज्ञ
ता हृदयाय नमः हृदयशक्तिश्री ॰१। आग्नेये क्लीं
नित्यतृप्ताशिरसे स्वाहाशिरःश्री ॰२। ईशान्ये।
सौः अनादिबोधाशिखायै वषट् शिखाशक्ति
श्री ॰३। नैर्ऋत्ये। ऐं स्वतंत्रताकवचाय हुं कवच
शक्तिश्री ॰४। वायव्ये क्लीं अलुप्तता नेत्रत्रयाय

त्रि॰प॰
२४

वौषट् नेत्रशक्तिश्री ॰५। मध्ये सौः अनंतता अस्त्रा
य फट् अस्त्रशक्तिश्री ॰६। इति षडंगयुवतीपूजा
ऐं ह्रीं श्रीं त्रैलोक्यमोहनचक्राय नमः। समस्तप्र
गटयोगिनीभ्यो नमः। आद्यरेखायां ३ अणिमा
सिद्धिश्री ॰ पश्चिमद्वारे। ३ लघिमासिद्धिश्री ॰ उ
त्तरद्वारे। ३ महिमासिद्धिश्री ॰ पूर्वद्वारे। ३ ईशत्व
सिद्धिश्री ॰ दक्षिणद्वारे। ३ वशित्वसिद्धिश्री ॰ वा

यव्ये ॥ ३ प्राकाम्यसिद्धिश्री ॥ ईशे ॥ ३ भुक्तिसिद्धिश्री ॥
आग्नेये ॥ ३ इच्छासिद्धिश्री ॥ नैर्ऋत्ये ॥ ३ प्राप्तिसिद्धिश्री
॥ अधः सर्वकामसिद्धिश्री ॥ ऊर्ध्वं ॥ मध्यरेखायां ॥ प
श्चिमादिप्रादक्षिण्येन ॥ ३ अं असितांगभैरवआं
ब्राह्मीदेवीश्री ॥ ३ इं रुरुभैरव ईं माहेश्वरीदेवीश्री ॥
३ उं चंडभैरव ऊं कौमारीदेवीश्री ॥ ३ ऋं क्रोधभैरव
ॠं वैष्णवीदेवीश्री ॥ ३ ऌं उन्मत्तभैरव ॡं वाराही

त्रि॰प॰
२५

ॐ

देवीश्री ॥ ३ एं कपालीभैरव ऐं इंद्राणीदेवीश्री ॥ ३
ओं भीषणभैरव औं चामुंडादेवीश्री ॥ ३ अं संहार
भैरव अः महालक्ष्मीदेवीश्री ॥ तृतीयरेखायां प
श्चिमादि ॥ द्रां सर्वसंक्षोभिणीमुद्राश्री ॥ १ ॥ द्रीं सर्व
विद्राविणीमुद्राश्री ॥ २ क्लीं सर्वाकर्षिणीमुद्राश्री ॥
३ ब्लूं सर्ववशंकरीमुद्राश्री ॥ ४ ॥ सः सर्वोन्मादि
नीमुद्राश्री ॥ ५ क्लौं सर्वमहांकुशामुद्राश्री ॥ ६ ॥ ह

सखफ्रेंसर्वखेचरीमुद्राश्री ॥ ७ ह्रौंसर्वबीजमु
द्राश्री ॥ इतिसंपूज्य ॥ ऐंसर्वयोनिमुद्राश्री ॥ ९
अधःसर्वत्रिखंडामुद्राश्री ॥ ऊर्द्ध्वे ॥ अं आं सौः त्रि
पुराचक्रेश्वरीश्री ॥ विशेषार्घ्यामृतेन नवचक्रे
श्वरीः तर्पयेत् ॥ अणिमासिद्धेः पुरतः चक्रेश्व
र्याः पार्श्वयोः अणिमासिद्धिश्री ॥ द्रांसर्वसंक्षो
भिणीमुद्राश्री ॥ इतिसंपूज्य ॥ एताः प्रकटयो

त्रि॰प॰
२६

गिन्यस्त्रैलोक्यमोहनचक्रेसमुद्राः ससिद्धयः
सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः
पूजितास्तर्पिताः संतु नमः ॥ इतिचक्रेश्वर्याः वा
महस्ते तज्जलदानेन पूजां समर्प्य ॥ मूलेन मूल
देवीं संपूज्य पुष्पांजलिमादाय अभीष्टसिद्धिमे
देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथ
मावरणार्चनं ॥ १ ॥ इति देवीचरणयोः पुष्पांजलिं

दत्वा प्रकटयोगिनि मयूषायै श्रीमहात्रिपुरसुं
दर्यै नमः इति संक्षोभिणीमुद्रां प्रदर्श्य योनिमु
द्रया प्रणमेत् इति प्रथमावरणं ॥१॥ सर्वाशाप
रिपूरकचक्राय नमः गुप्तयोगिनीभ्यो नमः ॥
३ अं कामाकर्षणी नित्याकलाश्री ॥ ३ उं स्प
र्शाकर्षिणी नित्याकलाश्री ॥२॥ ३ इं अहंकारा
कर्षिणी नित्याकलाश्री ॥३॥ ३ ईं शब्दाकर्षिणी

आं बु
ध्या २

त्रि॰प॰
२५

नित्याकलाश्री ॥४॥ ३ ऊं स्पर्शाकर्षिणी नित्या
कलाश्री ॥५॥ ३ ऊं रूपाकर्षिणी नित्याकला
श्री ॥६॥ ३ ऋं रसाकर्षिणी नित्याकलाश्री॰
७॥ ३ ॠं गंधाकर्षिणी नित्याकलाश्री ॥८॥ ३
ऌं चित्ताकर्षिणी नित्याकलाश्री ॥९॥ ३ ॡं
धैर्याकर्षिणी नित्याकलाश्री ॥१०॥ ३ एं स्मृत्या
कर्षिणी नित्याकलाश्री ॥११॥ ३ ऐं नामाकर्षि॰

णीनित्याकलाश्री॰।१२।३ॐबीजाकर्षिणीनित्या
कलाश्री॰।१३।३ॐआत्माकर्षिणीनित्याकला
श्री॰।१४।३अअमृताकर्षिणीनित्याकलाश्री॰।
१५।३अःशरीराकर्षिणीनित्याकलाश्री॰।१६।
एताःपश्चिमादिवामावर्त्तेनषोडशदलेपूज्याः त्रि॰प॰
ऐंक्लींसौःत्रिपुरेश्वरीचक्रेश्वरीश्री॰कामाकर्षि २८
ण्याःपुरतश्चक्रेश्वर्याःपार्श्वयोःलघिमासिद्धि

श्री॰द्रींद्राविणीमुद्राश्री॰।इतिसंपूज्य।एताःगु
प्तयोगिन्यःसर्वाशापरिपूरकचक्रेस॰।९५पं
चनवतीअक्षराणिप्राक्गतानिपवनीयानि
इतिद्वितीयावरणार्चनमितिपुष्पांजलिंद
त्वागुप्तयोगिनीमयूषायैश्रीमहात्रिपुरसुंद
र्यैनमइतिद्राविणीमुद्रांप्रदर्श्ययोनिमुद्रया
प्रणमेत्।इतिद्वितीयावरणं।२।सर्वसंक्षोभ

णचक्रायनमः गुप्ततरयोगिनीभ्योनमः। कं ५ अ
नंगकुसुमाश्री॰। पूर्वे। १। चं ५ अनंगमेखलाश्री॰।
दक्षिणे। २। टं ५ अनंगमदनाश्री॰ पश्चिमे। ३। तं ५
अनंगमदनातुराश्री॰ उत्तरे। ४। पं ५ अनंगरेखा
श्री॰ आग्नेये। ५। यं ४ अनंगवेगिनीश्री॰ नैऋ
त्ये। ६। शं ४ अनंगांकुशाश्री॰ वायव्ये। ७। ह्लं ह्रं
अनंगमालिनीश्री॰। ८। ईशाने। एता अष्टदले

त्रि॰ प॰
२९

प्रादक्षिण्येन पूज्याः क्लीं क्लीं सौः त्रिपुरसुंदरी चक्रे
श्वरीश्री॰। अनंगकुसुमायाः पुरतः चक्रेश्व
र्याः पार्श्वयोः। महिमासिद्धिश्री॰। क्लीं आकर्षि
णीमुद्राश्री॰। इति संपूज्य॥ एताः गुप्ततरयोगि
न्यः सर्वसंक्षोभकचक्रे ९५ तृतीयावरणार्च
नं। इति पुष्पांजलिं दत्वा गुप्ततरयोगिनीमयू
षायै श्रीमहात्रिपुरसुंदर्यै नमः। सर्वाकर्षिणी

मुद्रां प्रदर्श्य योनिमुद्रया प्रणमेत् । इति तृतीयाव
रणं । ३ । सर्वसौभाग्यदायकचक्राय नमः । संप्रदा
य योगिनीभ्यो नमः । इति संपूज्य । चतुर्दशारे पश्चि
मादिविलोमेन । कं सर्वसंक्षोभिणीशक्तिश्री ० ।
खं सर्वविद्राविणीशक्तिश्री ० । गं सर्वाकर्षिणीश
क्तिश्री ० । घं सर्वाह्लादिनीशक्तिश्री ० । ङं सर्वसं
मोहिनीशक्तिश्री ० । चं सर्वस्तंभिनीशक्तिश्री ० । छं

त्रि॰प॰
३०

सर्वजृंभिनीशक्तिश्री ० । जं सर्ववशंकरीशक्तिश्री ०
झं सर्वरंजनीशक्तिश्री ० । ञं सर्वोन्मादिनीशक्ति
श्री ० । टं सर्वार्थसाधिनीशक्तिश्री ० । ठं सर्वसंपत्पू
रिणीशक्तिश्री ० । डं सर्वमंत्रमयीशक्तिश्री ० । ढं स
र्वद्वंद्वक्षयंकरीशक्तिश्री ० । इति संपूज्य हैं हस
क्लीं ह्सौः त्रिपुरवासिनीचक्रेश्वरीश्री ० । सर्वसंक्षो
भिण्याः पुरतः तत्पार्श्वयोः ईशत्वसिद्धिश्री ० ।

ब्लूं सर्ववशंकरीमुद्राश्री॰। एताः संप्रदाययोगिन्य
ः सर्वसौभाग्यदायकचक्रेस॰ ९५ चतुर्थावरणा
र्चनं। इतिपुष्पांजलिं दत्वा संप्रदाययोगिनीमयू
षायैश्रीमहात्रिपुरसुंदर्यैनमइतिसर्ववशंकरी
मुद्रांप्रदर्श्ययोनिमुद्रयाप्रणमेत्। चतुर्थावर
णार्चनं। ४। सर्वार्थसाधकचक्रायनमः। कुलकौ
लयोगिनीभ्योनमः। बाह्यदशारे। णं सर्वसिद्धि

त्रि॰प॰
३१

प्रदादेवीश्री॰। तं सर्वसंपत्प्रदादेवीश्री॰। थं सर्वप्रि
यंकरीदेवीश्री॰। दं सर्वमंगलकारिणीदेवीश्री॰।
धं सर्वकामप्रदादेवीश्री॰। नं सर्वदुःखविमोचनी
देवीश्री॰। पं सर्वमृत्युप्रशमनीदेवीश्री॰। फं सर्व
विघ्ननिवारिणीदेवीश्री॰। बं सर्वांगसुंदरीदेवी
श्री॰। भं सर्वसौभाग्यदायिनीदेवीश्री॰॥ एताः प
श्चिमादिविलोमेनपूज्याः। सः सर्वोन्मादिनीमुद्रा

हसैं हसक्लीं ह्सौः त्रिपुराचक्रेश्वरीश्री ॥ सर्वसिद्धि
प्रदायाः पुरतः तत्पार्श्वयोः वशित्वसिद्धिश्री ॥ सः
सर्वोन्मादिनीमुद्राश्री ॥ इति संपूज्य ॥ एताः कुल
कौलयोगिन्यः सर्वार्थसाधके चक्रे स ॥ ९५ पंच
मावरणार्चनं ॥ इति पुष्पांजलिं दत्वा कुलकौल
योगिनीमयूषायै श्रीमहात्रिपुरसुंदर्यै नमः इ
ति सर्वोन्मादिनीमुद्रां प्रदर्श्य ॥ योनीमुद्रया प्रण

त्रि॰प॰
३२

मेत् इति पंचमावरणं ॥ ५ ॥ सर्वरक्षाकरचक्राय
नमः ॥ निगर्भयोगिनीभ्यो नमः ॥ अंतर्दशारे ॥ मं
सर्वज्ञादेवीश्री ॥ यं सर्वशक्तिंश्री ॥ रं सर्वैश्वर्य
प्रदादेवीश्री ॥ लं सर्वज्ञानमयीदेवीश्री ॥ वं स
र्वव्याधिविनाशिनीदेवीश्री ॥ शं सर्वाधारस्व
रूपादेवीश्री ॥ षं सर्वपापहरादेवीश्री ॥ सं स
र्वानंदमयीदेवीश्री ॥ हं सर्वरक्षास्वरूपिणीदे

वीश्री॰ ह्रंसर्वेप्सितफलप्रदादेवीश्री॰। एताः
पश्चिमादिविलोमेनांतर्दशारेपूज्याः। क्रींक्लीं
ब्लें त्रिपुरामालिनीचक्रेश्वरीश्री॰। सर्वरक्षायाः
पुरतस्तत्पार्श्वयोश्चप्राकाम्यसिद्धिश्री॰। क्रों
महांकुशामुद्राश्री॰। इतिसंपूज्य। एताः निग
र्भयोगिन्यः सर्वरक्षाकरेचक्रेस॰ ९५ षष्ट
मावरणार्च्चनं। इतिपुष्पांजलिंदत्वानिगर्भ

त्रि॰प॰
३३

योगिनीमयूषायैश्रीमहात्रिपुरसुंदर्यैनमः
इतिमहांकुशमुद्राप्रदर्श्ययोनिमुद्रयाप्रण
मेत्। षष्ठावरणं। ६॥ सर्वरोगहरचक्रायनमः
रहस्ययोगिनीभ्योनमः। इतिसंपूज्य। अष्टा
रे अं १६ रब्लूं वशिनीवाग्देवताश्री॰। कं ५ क
लक्रींकामेश्वरीवाग्देवीश्री॰। चं ५ न्ब्लीं मोदि
नीवाग्देवीश्री॰। टं ५ य्लूं विमलावाग्देवीश्री॰

तं ५ ज्म्रीं अरुणा वाग्देवी श्री ॰ । पं ५ हसलवयूं ज
यिनी वाग्देवी श्री ॰ । यं ४ झमरयूं सर्वेश्वरी वाग्दे
वी श्री ॰ । शं ६ क्ष्म्रीं कौलिनी वाग्देवी श्री ॰ । एताः
पश्चिमादिविलोमेन पूज्याः । क्रीं श्रीं सौः त्रिपुरा
सिद्धा चक्रेश्वरी श्री ॰ । वशिन्याः पुरतः तत्पार्श्व
योर्भुक्तिसिद्धि श्री ॰ । ह्रूं क्ष्रैं खेचरी मुद्रा श्री ॰ त्रि॰प॰
इति संपूज्य । एता रहस्ययोगिन्यः सर्वरोगह ३४

रचक्रे स॰ ९५ सप्तमावरणार्चनं । इति पुष्पांज
लिं दत्वा रहस्ययोगिनीमयूषायै श्रीमहात्रिपु
रसुंदर्यै नम इति खेचरीमुद्रां प्रदर्श्य प्रणमे
त् । इति सप्तमावरणं ७ ॥ अथाष्टकोणत्रिकोण
योरंतराले आयुधानि पूजयेत् । यां रां लां सां द्रां
द्रीं क्लीं ब्लूं सः कामेश्वरकामेश्वरी जृंभनबाण श्री ॰
धं थं कामेश्वरी वशीकरणपाश श्री ॰ । क्रों कामे

कामे
श्वर १

क्रीं कामे
श्वर कामे
श्वरी मोह
नचाप श्री
पा॰ २ ॥

श्वरकामेश्वरीस्तंभनअंकुशश्री॰। इतिपश्चिमा
दिचतुर्दिक्षुपूजयेत्। नेदमावरणंचक्रेश्वरीचक्र
नामाभावात्। सर्वसिद्धिप्रदचक्रायनमः। परा
पररहस्ययोगिनीभ्योनमः। त्रिकोणाग्रकोणे
प्रथमकूटं। अग्निचक्रेकामरूपपीठेमित्रीश
नाथात्मिकेजाग्रद्दशाधिष्ठायकेइच्छाशक्त्या
त्मरुद्रशक्तिश्रीकामेश्वरीदेवीश्री॰। दक्षेआ

त्रि॰प॰
३५

ग्नेयकोणेद्वितीयकूटं। सूर्यचक्रेजालंधरपीठे
षष्ठीशनाथात्मिकेस्वप्नदशाधिष्ठायकेज्ञान
शक्त्यात्मकविष्णुशक्तिश्रीवज्रेश्वरीदेवीश्री॰।
ईशवामकोणेतृतीयकूटं। सोमचक्रेपूर्णगिरि
पीठेउड्डीशनाथात्मिकेसुषुप्तिदशाधिष्ठायके
क्रियाशक्त्यात्मकब्रह्मेशशक्तिश्रीभगमालिनी
देवीश्री॰। इतिसंपूज्य हस्रैंहस्रक्लींहस्रौः त्रिपु

रांबिकाचक्रेश्वरीश्री ॰ । कामेश्वरीपुरतस्तत्पा
र्श्वयोः इच्छासिद्धिश्री ॰ ह्सौः बीजमुद्राश्री ॰ । इ
तिसंपूज्य एताः परापररहस्ययोगिन्यः सर्व
सिद्धिप्रदेचक्रेस ॰ ९५ अष्टमावरणार्च्चनं इ
तिपुष्पांजलिंदत्वापरापररहस्ययोगिनीम
यूषायैश्रीमहात्रिपुरसुंदर्यैनमइतिबीजमु
द्रांप्रदर्श्ययोनिमुद्रयाप्रणमेत् । इत्यष्टमा

त्रि॰प॰
३६

वरणं । ८ । सर्वानंदमयचक्रायनमः परापरा
तिरहस्ययोगिनीभ्योनमः । इतिसंपूज्य । बिंदौ
मूलं । ब्रह्मचक्रेमहोड्याणपीठेचर्यानंदनाथा
त्मकेतुरीयदशाधिष्ठायकेपरब्रह्मशक्तिश्री
महात्रिपुरसुंदरीश्री ॰ । इतिविशेषार्घ्येणत्रिः
संतर्प्य । पंचदशीमुच्चार्य श्रीमहात्रिपुरसुंद
रीश्रीचक्रेश्वरीश्री ॰ । तत्पार्श्वेप्राप्तिसिद्धिश्री ॰

ऐं योनिमुद्राश्री॰ श्रीपात्रेण संतर्पयेत्। एताः प
रापरातिरहस्ययोगिन्यः सर्वानंदमये चक्रे बैंद
वे परब्रह्मस्वरूपिणि परामृतशक्ति सर्वमंत्रेश्व
री सर्वविघ्नेश्वरि सर्वपीठेश्वरि सर्ववीरेश्वरि स
र्वयोगेश्वरि सर्वसिद्धेश्वरि सकलजगदुत्पत्ति
मातृकाः सचक्राः सदेवताः समुद्राः ससिद्धयः
सायुधाः सवाहनाः सपरिवाराः सालंकाराः स

त्रि॰प॰
३७

र्वोपचारैः श्रीमहात्रिपुरसुंदर्याः परयाचापर
यापरापरया सपर्यया पूजितास्तर्पिताः संतु न
म इति नवमावरणार्चनं। इति पुष्पांजलिं दत्वा।
परापरातिरहस्ययोगिनीमयूखायै श्रीमहात्रिपु
रसुंदर्यै नम इति योनिमुद्रां प्रदर्श्य प्रणमेत्। इति
नवमावरणं। ९। बिंदुचक्रमध्यवर्त्तिभावनाख्य
प्रणवरूपपीठाय दशमचक्राय नमः। मूलं नव

चक्रचक्रेश्वरीसमष्टिरूपश्रीमहात्रिपुरसुंदरी
देवीश्री॰ रक्तपुष्पैः संपूज्य विशेषार्घ्येण संतर्प्य
तस्याः पुरतः मूलं तामेव चक्रेश्वरीं संपूज्य यथा
मूलं बिंदुचक्रमध्यवर्त्तिभावनाख्यप्रणवपीठ
चक्ररूपदशमचक्रवृत्तिनवचक्रयोनवचक्रे
श्वरीसमष्टिरूपश्रीमन्महात्रिपुरसुंदरीचक्रे
श्वरीश्री॰ तत्पार्श्वयोः सर्वकामसिद्धिश्री॰

त्रि॰प॰
३८

ऐं क्लीं सौः त्रिखंडामुद्राश्री॰ श्रीपात्रेण संतर्प्य
एताः समष्टिरूपनवचक्रमयदशमचक्रस्थाः
समष्टियोगिन्यः भावनाख्यप्रणवपीठरूपद
शमचक्रेस॰ ९५ दशमावरणार्चनं इति पुष्पां
जलिं दत्वा त्रिखंडामुद्रां प्रदर्श्य योनि॰ प्रणमे
त् इति दशमावरणं १० ॥ ॥ इति सुंदरिपूजा
रत्ने आवरणपूजाविधौ वज्ररत्नं नाम सप्तमं

रत्नं ७ ॥ अथो चतुःसमया पूजा । बिंदावेव देव्यग्रे
हृन्मंत्रेण कामेश्वरि पूर्वसमयदेवता श्री । वामे
ऐं ह्रीं सर्वकामार्थसाधिनि वज्रेश्वरि वज्रपदे वज्र
पंजरमध्यगते ह्रीं क्लीं न्ने ऐं क्रों नित्यमदद्रवे ह्रीं
वज्रनित्यायै नमः वज्रेश्वरि दक्षिणसमया देवी
श्री । दक्षे तन्मंत्रेण भगमालिनि पश्चिमसमय
दे । उत्तरे । क्लीं भगवति ब्लें नित्ये कामेश्वरि ह्रीं सर्व

त्रि॰प॰
३९

सत्ववशंकरि सस्त्रिपुरभैरवि ऐं विच्चे क्लीं महात्रि
पुरसुंदर्यै नमः श्रीमहात्रिपुरसुंदरि उत्तरसम
यदेवता श्री । इति चतुःसमया पूजा ॥ बिंदावेव
समया पूजा स्थानाद्बहिः परितः षट्कोणं विभाव्य
तत्कोणेषु अं १६ डांडीं डूं डैं डौं डः डमलवरयूं डाकि
नी श्री । नैर्ऋत्ये । कं १२ रांरीं १० राकिनी श्री । वाय
व्ये डं १० लांलीं १० लाकिनी श्री । पूर्वे बं ६ कांकीं १०

काकिनीश्री०। आग्नेयेवं ४ सांसीं १० साकिनीश्री०
ईशेहंक्षंहांहीं १० हाकिनीश्री०। पश्चिमे। इतिषट्
डाकिन्यादिपूजा। पश्चिमेसर्वयोगिन्यः सर्वभूत
गणाभ्यः सर्वभूताधिपतिडाकिनीभ्यः साकिनी
भ्यः इमांपूजांबलिंगृह्ण २ स्वाहासर्वयोगिनीश्री
०। पूर्वद्वारे। क्षेत्रपालायनमः क्षेत्रपालश्री० दक्षि त्रि०प०
णे ॐश्रींक्लींक्लींग्लौंगंगणपतयेवरवरदसर्वज ४०

नंमेवशमानयस्वाहाश्रीमहागणपतिश्री०। उ
त्तरे ॐक्लींबटुकायआपदुद्धारणायकुरु २ बटु
कायश्रींक्लींबटुकभैरवश्री०। ततः पश्चिमद्वारे
ॐनमोभगवतिमाहेश्वरिपशुजनमनश्चक्षुति
रस्करणंकुरु २ स्वाहा इतिसंपूज्य। इतियोगिनी
दिपूजा। अथदर्शनपूजा। त्रैलोक्यमोहनचक्रे।
अंतारेंतुत्तारेतुरेस्वाहानाराधिष्ठितबौद्धदर्शनी

देवीश्री॰। षोडशदले अं ब्रह्मणे नमः ब्रह्मदेवता-
धिष्ठितवैदिकदर्शनी देवीश्री॰। अष्टदले अं हौं शि-
वाय हौं नमः रुद्रदेवताधिष्ठितशैवदर्शनी देवी।
श्री॰। चतुर्दशारे। अं ह्रीं हंसः सूर्यदेवताधिष्ठितसौ-
रदर्शनी देवीश्री॰। द्वादशारे। ॐ नमो नारायणाय वि-
ष्णुदेवताधिष्ठितवैष्णवदर्शनी देवीश्री॰। नवयो-
निचक्रे ह्रीं भुवनेश्वरी देवताधिष्ठितशाक्तदर्शनदे-

त्रि॰प॰
४१

वीश्री॰। इति षट्दर्शनपूजा। ततो देवीदेहे पूजये-
त्। अआ एकचटतपयषप्राणशक्तिश्री॰। इ-
ई एखछठथफरसअग्निशक्तिश्री॰। उऊऊ
गजडदबलहपृथिवीशक्तिश्री॰। ऋॠऌॡ घ-
झढधभवह्लंअंबुशक्तिश्री॰। ऌॡअंङञणन-
मशक्षःखशक्तिश्री॰। इति पंचभूतशक्तिपू-
जा। श्रीचक्राद्बहिः पूर्वादिदिक्षु विदिक्षु चानु

पूर्वेण इंद्रादयो वनितारूपाः पूज्याः । यथा । लं
इंद्रशक्तिश्री । रं अग्निशक्तिश्री । यं यमशक्ति
श्री । क्षं निर्ऋतिशक्तिश्री । वं वरुणशक्तिश्री ।
यं वायुशक्तिश्री । सं सोमशक्तिश्री । हं ईशश
क्तिश्री । आं ब्रह्मशक्तिश्री । पूर्वेशानमध्ये
ह्रीं अनंतशक्तिश्री । निर्ऋतिपश्चिममध्ये
तद्बहिः । आयुधानि पूजयेत् । पुनः वज्रशक्ति ।

त्रि॰प॰
४२

शक्तिशक्ति । दंडशक्ति । खड्गशक्ति । पाशश
क्ति । अंकुशश । गदाशक्ति । खड्गशक्ति । त्रि
शूलशक्ति । पद्मशक्ति । चक्रशक्ति । इति सं
पूज्य श्रीपात्रेण तर्प्पयेत् । पुनर्मूलेन मूलदे
वीं पूजयेत् । इत्यावरणपूजा । ततो मूलेन श्रीम
हात्रिपुरसुंदर्यै स्वर्गंधो नम इति गंधं समर्प्य
गंधमुद्रां प्रदर्श्य । पुष्पाणि वौषडिति पुष्पाणि

समर्प्य पुष्पमुद्रां प्रदर्श्य गजध्वनिमंत्रमातः स्वा
हा इति घंटां संपूज्य वादयेत् । धूपग्राहिण्यां अंगा
रान्निक्षिप्य फडिति प्रोक्ष्य गुग्गुलादिकं निक्षिप्य
वनस्पतिरसोत्पन्नो गंधाढ्यो धूप उत्तमः । आ
घ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां । १ । सांगा त्रि॰प॰
यै श्रीमहात्रिपुरसुंदर्यै धूपं समर्पयामि इति ४३
धूपमुद्रां प्रदर्श्य देव्या वामे निवेद्य दीपं प्रज्वा

ल्य । ॐ ज्वालामालिनी हुं फट् इत्यभिमंत्र्य । सुप्र
काशो महादीपः सर्वत्र तिमिरापहः । सबाह्या
भ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां । सांगायै श्री
महात्रिपुरसुंदर्यै दीपं निवेद्य । देव्याः दक्षिणभा
गे निवेद्य । दीपमुद्रां प्रदर्श्य । भूमौ त्रिकोणं वृत्तं
चतुरस्रं कृत्वा तत्राधारे स्वर्णादिपात्रस्थितं नै
वेद्यं संस्थाप्य फडिति प्रोक्ष्य धेनुमुद्रया मृतीकृत्य

चक्रमुद्रां प्रदर्श्य। क्लीं कामदुघे अमोघे वरदे
विच्चे स्फुर २ आं इत्यभिमंत्र्य हेमपात्रगतं दि
व्यं परमान्नं सुसंस्कृतं। चतुर्धा षट्रसोपेतं
गृहाण परमेश्वरि। १। सांगायै श्रीमहात्रिपुर
सुंदर्यै नैवेद्यं निवेद्य समर्पयामि नम इति स
मर्प्य अमृतोपस्तरणमसि स्वाहा इति जलं
दत्वा प्राणाय स्वाहेत्यादि पंचमुद्राः प्रदर्श्य

त्रि॰प॰
४४

नमस्ते देवदेवेशि सर्वतृप्तिकरं परं। पानं नि
वेदितं शुद्धं प्रकृतिस्थं सुशीतलं। परमानंदसं
पूर्णं गृहाण जलमुत्तमं। १। इति जलं समर्प्य
दृष्टिपथमाछाद्य। ब्रह्मेशाद्यैः सरसमभितः
सूपविष्टैः समेतासिंजद्वालव्यजननिकरै
र्वीज्यमानासखीभिः। नर्मक्रीडाप्रहसनप
रा पंक्तिभोक्तॄन् हसंती भुंक्ते पात्रे कनकघ

टितेषट्रसान्विश्वमाता ।१। इतिदेवींभुक्तवतीं
ध्यात्वाआचमनंदत्वातांबूलंदत्वा । पत्रपूगस
मायुक्तंकह्लारादिसुवासितं । मयानिवेदितंदे
वितांबूलंप्रतिगृह्यतां ।१। सांगायैश्रीमहात्रि
पुरसुंदर्य्यैतांबूलंसमर्प्पयामिनमइतिनिवे
द्य । अथनित्यहोमः । स्वदक्षिणेकुंडंस्थंडिलं
कृत्वाऋष्यादिकंकृत्वाकांस्यपात्रपिहितंव

त्रि॰प॰
४५

ह्निमावाह्यकृव्यादांशंपरित्यज्यकुंडोपरित्रिः
परिभ्राम्यआत्मसंमुखंकुंडेक्षिपेत् । संपूज्य
प्रज्वाल्य । अग्निंप्रज्वलितंवंदेजातवेदंहुता
शनं । सुवर्णवर्णमनलंसमिद्धंसर्वतोमुखं ।१
इतिप्रणम्य । क्लींवह्निमूर्त्तयेनमइतिवह्निमू
र्त्तिंपरिकल्प्यतस्मिन्देवतामावाह्यमूलेन
षोडशाहुतींहुत्वा । मूलंप्राणायस्वाहा । ॐअ

पानायस्वाहा। ॐ व्यानाय॰। ॐ उदानाय॰। ॐ समा
नाय॰। न्यूनातिरिक्तसिद्ध्यर्थं ददामि सघृतं हविः
ॐ हूं सांगं कुरु २ स्वाहा। इत्येकामाहुतिं पूर्णा
हुतितया दद्यात्। ततो देवतां यथास्थाने निवे
श्य वह्निं संपूज्य विसर्जयेत्॥ इति नित्यहोम
विधिः॥ अथ बलिदानं। ईशान्याग्नेयनैर्ऋत्य
वायव्योत्तरकोणेषु प्रणवेन त्रिकोणवृत्तचतु

त्रि॰प॰
४६

रस्त्राणि कृत्वा क्रमेण पूजयेत्। बां बटुकाय नमः
यां योगिनीभ्यो नमः। क्षां क्षेत्रपालाय॰। गं गणप
तये॰। ॐ व्यापकमंडलाय॰। एह्येहि देवीपुत्र बटु
कनाथ कपिलजटाभारभासुर त्रिनेत्रज्वालामु
ख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहि
तं बलिं गृह्ण २ स्वाहा। एष बलिर्बटुकाय नम
इति वामांगुष्ठानामिकाभ्यां बलिपात्रादुत्सृजेत्

बलिदानेन संतुष्टो बटुकः सर्वसिद्धिदः। शांतिक
रोतु मे नित्यं भूतवेतालसेवितः। इति पुष्पांजलिं
दद्यात्। इति बटुकबलिः। आग्नेयमंडले। ऊर्ध्वं
ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा
पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थि
ता वा। क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदी
पादिकेन प्रीता देव्यः सदा नः शुभबलिविधिना

त्रि॰प॰
४७

पांतु वीरेंद्रवंद्याः॥१॥ यां योगिनीभ्यः स्वाहा सर्वयो
गिनीभ्यो हुं फट् स्वाहा एष बलिः सर्वयोगिनी
भ्यो नम इति वामकरांगुष्ठमध्यमानामिकाभि
र्योन्याकारेण बलिमुत्सृजेत्। याः काश्चित् यो
गिनी रौद्राः सौम्या घोरतराः पराः खेचरी भूच
रीव्योमचरी प्रीतास्तु मे सदा। इति पुष्पांजलिः
इति योगिनीबलिः। नैर्ऋत्यमंडले। क्षां क्षीं क्षूं

म२

ह्रैं ह्रौं ह्रः स्थानक्षेत्रपालधूपदीपादिसहि
तं बलिं गृह्ण २ स्वाहा एष बलिः क्षेत्रपालाय न
म इति वाममुष्टिं बध्वा दीर्घतर्जन्यांगुष्ठयोगेन
बलिमुत्सृजेत् । योस्मिन्क्षेत्रे निवासी च क्षेत्रपा
लः स किंकरः प्रीतोयं बलिदानेन सर्वरक्षां
करोतु मे इति क्षेत्रपालबलिः । वायव्यमंडले
गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं

त्रि॰प॰
५८

मे वशमानय बलिं गृह्ण २ स्वाहा एष बलिर्ग
णपतये नम इति वाममुष्टिं बध्वा दीर्घमध्य
मांगुष्ठयोगेन बलिमुत्सृजेत् । सर्वदा सर्वका
र्याणि निर्विघ्नं साधयेन्मम शांतिं करोतु सत
तं विघ्नराजः सशक्तिकः । इति पुष्पांजलिः ॥ इ
ति गणपतिबलिः । उत्तरमंडले । ॐ ह्रीं सर्वविघ्न
कृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा एष बलिः स

र्वभूतेभ्यो नम इति वा॰ मकरस्य सर्वांगुलीभिर्बलि
मुत्सृजेत्। भूता ये विविधाकारा दिव्या भूम्यंतरि
क्षगाः पातालतलसंस्थाश्च शिवयोगेन भावि
ताः। क्रूराद्याः शतसंख्याकाः पाषंडाद्या व्यवस्थि
ताः। तृप्यंतु प्रीतमनसो भूता गृह्णंत्विमं बलिं। २। इ
ति पुष्पांजलिः। इति सर्वभूतबलिः। पुष्पांजलि
माहाय बलिदानेन संतुष्टाः क्षमध्वं बलिदेव

त्रि॰ प॰
४९

ताः। यथासुखं विहरंतु यथेष्टासु दिशासु च। १। ब
टुकाद्याः सुराः सर्वे सर्वसिद्धिविधायिनः मम
शांतिः पुष्टिस्तुष्टिश्चास्तु तत्तत्प्रसादतः। इत्यु
च्चार्य तान् विसर्ज्य शुद्धजलेनात्मानं प्रोक्षयेत्। इ
ति बलिदानविधिः॥ अथ रात्रिकां कुर्यात्॥ प्र
ज्वाल्य ग्रूं स्लं स्लूं प्लं ब्लूं रत्नेश्वर्यै नम इति संपूज्य
आमस्तकमुद्धृत्य उत्थाय घंटां वाद्य देव्यामस्त

कादिपादपर्यंतं। मूलांते। समस्तचक्रचक्रे। शी
युते देवि नवात्मिके। आरात्रिकमिदं देवि गृहा
ण मम सिद्धये। इति पठन् देव्या मस्तकोपरि
त्रिः भ्रामणपूर्वकं नवकृत्वो निराजयेत्। मू
लांते सांगायै सपरिवारायै श्रीमहात्रिपुर
सुंदर्यै आरात्रिकां समर्प्पयामि नम इति स
मर्प्पयेत्। तस्याः निर्वाणं न कर्त्तव्यं निषिद्ध

त्रि॰प॰
५॰

त्वात्। इत्यारात्रिकविधिः। निंबपत्रेण पिष्टपी
डेन वा पुष्पेण वा दृष्टिमुत्तार्ज्य स्वात्मानं काम
कलारूपं विभाव्य देव्यै राजोपचारान्परिक
ल्पयेत्। छत्रं। चामरं। आदर्शं। व्यंजनं। तूलिका।
गंडोपधानं दीपमालादिकं यथाविभवं कुर्या
त्। स्वर्णादिपात्रे जलं निधाय साधारं पूर्वोक्तमं
त्रेण निवेदयेत्॥ इति राजोपचारः॥ ऋष्यादि

करषडंगंविधायजपंकृत्वाजपंदेव्यैसमर्प्पये
त्।गुह्यातिगुह्यगोप्त्रीत्वंग्रहाणास्मत्कृतंजपं।
सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि।१।स
मर्प्पदेव्यैपुष्पांजलिंदत्वाघंटावादनपूर्वकं
स्तोत्रंपठेत्॥ ॥इतिसुंदरीपूजारत्नेसमया
दिपूजाविधौगोमेदरत्नंनामअष्टमंरत्नं।८।
श्रीमत्श्रीकोशहृदयंपंचसिंहासनात्मकं

त्रि·प·
५१

फलंकल्पलतानांचचारुरत्नस्फुटत्कलं।१।च
तुरायतनानंदिचतुरन्वयकोशगं।नित्यानंदि
परंब्रह्मधामनौमिसुखाप्तये।२।गणेशग्र
हनक्षत्रयोगिनीराशिरूपिणीं।देवींमंत्रमयीं
नौमिमातृकांपीठरूपिणीं।३।प्रणमामिमहा
देवींमातृकांपरमेश्वरीं।कालहल्लोहलोल्लो
लकलनाशनकारिणीं।४।यदक्षरैकमात्रेपिसं

सिद्धेः स्पर्द्धते नरः। रविताक्षेंदुकंदर्पशंकरान
लविष्णुभिः ॥५॥ यदक्षरशशिज्योत्स्नामंडितं भु
वनत्रयं। वंदे सर्वेश्वरीं देवीं महासंसिद्धमातृकां
॥६॥ यदक्षरमहासूत्रे प्रोतमेतज्जगत्त्रयं। ब्रह्मां
डादिकटाहांतं तां वंदे सिद्धमातृकां ॥७॥ यदेकाद
शमाधारं बीजं कोणत्रयोद्भवं। ब्रह्मांडादिक
टाहांतं जगदद्यापि दृश्यते ॥८॥ अकचादिटतो

त्रि॰प॰
५२

न्नद्धपयशाक्षरगर्भिणीं। ज्येष्ठांगबाहुहृत्पृष्ठ
कटिपादनिवेशिनीं ॥९॥ तामिकाराक्षरोद्धारां सा
रात्सारां परात्परां। प्रणमामि महादेवीं परमानं
दरूपिणीं ॥१०॥ अद्यापि यस्या जानंति न मनाग
पि देवताः। केयं कस्मात्क्व केनेति स्वरूपारूप
भावनां ॥११॥ वंदे तामहमक्षय्यक्षकाराक्षररूपि
णीं। देवीं कुलकलोल्लोलप्रोल्लसंतीं परां शिवां ॥१२

वर्गानुक्रमयोगेनयस्यांमात्राष्टकंस्थितं। वंदेताम
ष्टवर्गोत्वांमहासिद्ध्यष्टकेश्वरीं।१३। कामपूर्णज
काराख्यश्रीपीठांतर्निवासिनीं। चतुराज्ञाकोश
भूतांनौमिश्रीत्रिपुरामहं।१४। इतिद्वादशभिःश्लो
कैःस्तवनंसर्वसिद्धिकृत्। देव्यास्त्वखंडरूपायाः
स्तवनंतवयद्यतः।१५। इतिस्तुत्वापुष्पांजलिंद
त्वाअन्यैरपिवैदिकैःपौराणिकैःस्तोत्रैःयथाव

त्रि॰प॰
५३

काशंस्तुत्वाप्रार्थनामुद्रांबध्वास्तवंपठेत्। किंकिं
दुःखंदनुजदलिनीक्षीयतेनस्मृतायांकाकासि
द्धिःसुरवरनतेप्राप्यतेनार्चितायां। काकाकीर्तिः
कुलकमलिनीख्याप्यतेनस्तुतायांकंकंयोगंत्व
यिनिचुनतेचित्तमालंबितायां।१। स्मृताभवभयं
हिंसिपूजितासिशुभंकरि। स्तुतात्वंवांछितंव
स्तुददासिकरुणाकरे।२। भक्तस्यमेनित्यपूजा

रतस्यपरमेश्वरि।वाग्भवादिमहासिद्धिंदेहित्रिपु
रसुंदरि।३।परमानंदसंदोहप्रमोदभरनिर्भरे।
दुःखत्रयपरिम्लानवदनंत्राहिमांशिवे।४।शब्द
ब्रह्ममयेस्वच्छेदेवित्रिपुरसुंदरि।यथाशक्तिजपं
पूजांगृहाणमदनुग्रहात्।५।द्रव्यहीनंक्रियाही
नंमंत्रहीनंचयद्भवेत्।तत्सर्वंकृपयादेविक्षम
स्वपरमेश्वरि।६।यन्मयोक्तमिहाज्ञानात्तन्मह

त्रि॰प॰
५४

त्स्वल्पमेववा।हंतसर्वंजगद्धात्रीक्षंतव्यमयमं
जलिः।७।अपराधसहस्राणिक्रियंतेहर्निशंम
या।दासोहमितिमांमत्वाक्षमस्वपरमेश्वरि।८
आवाहनंनजानामिनजानामिविसर्जनं।पूजां
चैवनजानामित्वंगतिःपरमेश्वरि।९।इतिपुष्पां
जलिंदत्वाप्रणम्यप्रदक्षिणांकृत्वा।सर्वमंगल
मांगल्येशिवेसर्वार्थसाधके शरण्येत्र्यंबकेगौ

कारूपधारिणीं। नवदुर्गात्मिकां साक्षात्कन्या
मावाहयाम्यहं।१। इति बालाविद्ययाच। त
स्याः पुष्पांजलिनावाह्य बालया कुमारीश्री
पादुकां पूजयामीति संपूज्य। गंधादितांबू
लदक्षिणांतमुपचारं कुर्यात्। षोडशाष्टपर्यं
तं कुमारी ततऊर्द्ध्वं सुवासिनीमिति तांत्रिकसं
प्रदायः। सा तु मूलविद्यया आवाह्य आवा

त्रि॰प॰
५६

हनादित्रयोदशमुद्राः प्रदर्श्य संक्षोभणादि
नवमुद्राः प्रदर्श्य गंधादिदक्षिणांतां उपचा
रान् कल्पयेत्। ततः शक्तिपात्रं दत्वा विसर्ज
येत्। इति कुमारीपूजा। ततः गुरुं पूजयेत् त
स्यै दिशे सततमंजलिरेष पुष्पैः प्रक्षिप्यते
रसयुतो मधुरैर्द्विरेफैः। जागर्त्ति यत्र भगवा
न् गुरुचक्रवर्त्ती विश्वोदयप्रलयनाटकसू

त्रधारः ॥१॥ इति प्रार्थ्य । देवताथ गुरोस्वामिन् देशि
कस्वात्मनायक । त्राहि त्राहि कृपासिंधो पूजां पू
र्णतमां कुरु ॥२॥ इति प्रणम्य तदीयं पात्रं निवेद्य
तदभावे जले क्षिपेत् । इति गुरुपूजा ॥ आत्मपा
त्रं । ॐ ह्रीं हंसः सोहं स्वाहा । इति स्वीकुर्यात् । ह्रां
ह्रीं हंसः सूर्याय मार्त्तंडभैरवाय एष तेर्घः ॥ इ
ति सूर्यार्घं दत्वा । यज्ञच्छिद्रं तपः छिद्रं यच्छिद्रं य

त्रि॰प॰
५७

ज्ञकर्मणि । सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसा
दतः इति सूर्ये ~~र्घं दत्वा~~ पुष्पांजलिं दद्यात् । अ
भीष्टसिद्धिं मे देहि शरणागतवत्सले । भक्त्या
समर्पये तुभ्यं समस्तावरणार्चनं ॥१॥ इति सम
र्प्य । ततः पूर्णविद्यया केवलपुष्पेण मूलदेवीं
सप्तवारमभ्यर्चयेदिति प्रसन्नपूजा ॥ कृतां
जलिः यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं

निवेदितंचनैवेद्यंतद्गृहाणानुकंपया।१।आवा
हनंनजानामिनजानामिविसर्जनं।पूजाभागं
नजानामित्वंगतिःपरमेश्वरि।२।कर्मणाम
नसावाचात्वत्तोनान्यागतिर्मम।अंतश्चारे
णभूतानांदृष्ट्रीत्वंपरमेश्वरि।३।मातर्योनिस
हस्रेषुयेषुयेषुव्रजाम्यहं।तेषुतेष्वच्युताभ
क्तिरच्युतास्तुसदात्वयि।४।देवीदात्रीच

त्रि॰प॰
५८

भोक्त्रीचदेवीसर्वमिदंजगत्।देवीजयतिस
र्वत्रयादेवीसाहमेवहि।५।यदक्षरपदभ्रष्टं
मात्रीहीनंचयद्भवेत्।क्षंतुमर्हसिमेदेविक
स्यनस्खलितंमनः।६।क्षमस्वदेवदेवेशि
त्रिपुरेपरमेश्वरि।तवपादांबुजेनित्यंनिश्च
लाभक्तिरस्तुमे।७।इतिक्षमाप्ययोनिमुद्र
याप्रणमेत्।शंखमुद्धृत्यदेव्युपरित्रिःभ्राम

यित्वा। साधुवासाधुवाकर्मयद्यदाचरितंम
या। तत्सर्वंकृपयादेवीगृहाणाराधनंमम।१
इतिदेव्युपरिजलंक्षिपेत्। दक्षहस्तेजलंशं
खस्थंकिंचिन्निधायशंखंयथास्थानंस्थाप्य
तस्मिन्जलेगंधादिनिक्षिप्यसप्तवारमभि
मंत्र्यतेनजलेनात्मानंप्रोक्षयेत्। सामान्या
र्घजलेनसर्वान्प्रोक्षयेत्। इतिसामान्यार्घ

त्रि॰प॰
५९

प्रतिपत्तिः। पुष्पांजलिमादाय। ॐरश्मिरूपा
महादेव्यअत्रपूजितदेवताः। श्रीसुंदर्य्यं
गलीनास्ताःसंतुसर्वशुभावहाः।१। इतिपु
ष्पांजलिंक्षिप्त्वारश्मिवृंददेवतामूलदेव्यां
विलीनाःविभाव्य। मूलमुच्चार्यश्रीमहात्रि
पुरसुंदरीपराम्मुखार्घंकल्पयामिस्वाहा
इतिपराम्मुखार्घ्यंदत्वाखेचरीमुद्रांबध्वा

मूलमुच्चार्य श्रीत्रिपुरसुंदरि क्षमस्वेति। देवीं
तालत्रयेण प्रबोध्य तेजोमयीं विचिंत्य। गच्छ
गच्छ परं स्थानं स्वस्थानं परमेश्वरि यत्र ब्रह्मा
दयो देवा न विदुः परमं पदं॥१॥ इत्युच्चार्य संहा
रमुद्रया पुष्पं गृहीत्वा आघ्राय तां हृदयगतां
विचिंत्य। तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमे
श्वरि यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंतु मे हृदि

त्रि॰प॰
६॰

इति स्वहृदये देवीं संयोज्य मानसैरुपचारैः
संपूज्य। तेजोरूपां ध्यात्वा कुंडलिरूपेण मूला
धारे स्थापयेत्॥ ईशान्ये त्रिकोणं वृत्तं चतुरस्रं
कृत्वा। ऐं नमः उच्छिष्टचांडालिमातंगि सर्वभू
तवशंकरि स्वाहा शेषिकाश्रीपादुकां॥ निर्मा
ल्यपुष्पैस्त्रिः संपूज्य नैवेद्यांशं दत्वा ततो नि
र्माल्यपुष्पांजलिमादाय। अंले ह्यचोष्यान्न

पानादितांबूलंस्रग्विलेपनं। निर्माल्यभोज
नंतुभ्यंददामिश्रीशिवाज्ञया। इतिपुष्पांजलिं
दद्यात्। इतिनिर्माल्यवासिनीपूजा। ॐदेवीप
रिचारकेभ्योनमइतिपूजावशिष्टंगंधपुष्पा
दिकंभूमौविकिरेत्॥ अथचक्राद्बहिर्गत्वा
शुद्धदेशेत्रिकोणवृत्तचतुरस्रंकृत्वा। गदात्रि
कोणडमरुपात्रहस्तंत्रिलोचनं। कृष्णाभंभै

त्रि॰प॰
६१

रवंदेवंसर्वविघ्नविनाशिनं। इतिध्यात्वाऐंह्रींश्रीं
उच्छिष्टभैरवएह्येहिबलिंगृह्ण२ हुंफट्स्वाहा
अनेनमंत्रेणपात्रस्थंबलिंतस्मिन्मंडलेविसृ
ज्य। हस्तौपादौप्रक्षाल्याचम्यतत्पात्रंजलेनापूर्य
गृहद्वारंगत्वाउदयोस्तुक्रव[illegible]न्नंतः प्रविश्यस्वा
सनेउपविश्यतत्पात्रेशंखोदकंकिंचिद्विशेषा
र्घोदकमेकीकृत्यसामयिकानभिषिंचन्शां

तिस्तोत्रं पठेत् । तद्यथा । नश्यंतु प्रेतकूष्मांडान
श्यंतु दूषकानराः । साधकानां शिवाः संतु आ
म्नायपरिपालनात् ॥ १ ॥ जयंतु मातरः सर्वा ज
यंतु योगिनीगणाः । जयंतु सिद्धडाकिन्यो जयं
तु गुरुपंक्तयः ॥ २ ॥ इंद्राद्यास्तर्पिताः संतु तृप्यं
तु वास्तुदेवताः । चंद्रसूर्यादयो देवास्तृप्यंतु
मम भक्तितः ॥ ३ ॥ अंतरिक्षचरा ये च ये चान्ये

त्रि॰प॰
६२

देवयोनयः । सर्वे तु सुखिनो यांतु सर्वानंदत
पस्विनः ॥ ४ ॥ पशवस्तरवश्चैव पर्वताः कंद
रा गुहाः । ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु
मे सदा ॥ ५ ॥ तीर्थानि पशवो गावो याश्चान्याः
पुण्यभूमयः । वृद्धाः पतिव्रता नार्यः शिवं कु
र्वंतु मे सदा ॥ ६ ॥ शिवं सर्वत्र मे चास्तु पुत्रदार
धनादिषु । राजानः सुखिनः संतु क्षेमो मार्गस्तु

मेसदा ॥७॥ शुभामेदिवसायांतुइष्टास्तिष्ठंतुमेशि
वाः ॥ साधकाजयिनःसंतुशिवंतिष्ठंतुपूजकाः
॥८॥ शत्रवोनाशमायांतुममनिंदाकराश्चये ॥ द्वे
ष्टारःसाधकानांचविनश्यंतुशिवाज्ञया ॥९॥
येनिंदकास्तेविलयंप्रयांतुयेसाधकास्तेप्र
भवंतुसिद्धाः ॥ सर्वत्रदेवीकरुणावलोकात्पु
रःपरेशीममसन्निधत्तां ॥१०॥ इतिपठन्सर्वा

त्रि॰प॰
६३

नभिषिंचेत् ततोविशेषार्घपात्रंगुर्वादिभ्यः
समर्प्यस्वीकुर्यात् मूलेनस्वचरणोदकंस्वी
कृत्यनैवेद्यादिविभज्यॐसर्वभूतानितृप्यंतु
इतिश्रीपात्रंविशेषार्घपात्रंन्युब्जीकृत्यउप
रिपुष्पंदत्वातदमृतसिक्तभूमौमायाबीजं
विलिख्य यंयंस्पृशामिहस्तेन यंयंपश्यामि
चक्षुषा सएवदासतांयातुयदिशक्रसमोभ

वेत्॥१॥ इति ललाटे तिलकं कृत्वा ऋष्यादिकं वि
न्यस्य प्राणायामं कृत्वा यंत्रलेपं शिरसि निधा
य यथासुखं विहरेत्॥ ॥ इति सुंदरीपूजा
रत्नेस्तवादिविधौ नित्यानंदनाथविरचिते
पद्मरागरत्नं नाम नवमं रत्नं॥ ॥ संपूर्णोयं
ग्रंथः॥ ॥ शुभं भवतु॥ ॥ श्रीरस्तु॥
सिंदूरदूरतरसुंदरवर्णवर्णा बालारुणारु

त्रि॰प॰
६४

णितमंबरमादधाना। बालप्रवालरुचिरा
धरबिंबशोभा। श्रीसुंदरि वसतु मे हृदये स
दैव॥१॥ ॥ यदक्षरपदभ्रष्टं स्वरव्यंजनव
र्जितं। लिखितं चेत्तदस्माभिः संशोध्यं हि म
नीषिभिः॥१॥ ॥ इति श्रीत्रिपुरसुंदरीपूजा
पद्धतिः संपूर्णा॥ ॥ संवत् १८०१४ वैशाखे
सिते पक्षे पंचम्यां भृगौ समाप्ता॥ ॥ श्रीः॥

त्रि॰प॰
६५